# Bharatadeshah

# भारतदेशः

## Document Information

Text title : Bharatadeshah

File name : bhAratadeshaH.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# भारतदेशः

(गीतिका)
देशोऽस्तु भारतो मे, कीर्त्या श्रिया समिद्ध ।
देश प्रबुद्ध एष सुषमा-गुणै समृद्ध ॥ देशोऽस्तु० ॥

विश्वस्य शान्ति-हेतु, दैन्याऽऽधि-नाश-केतु ।
गुण-गौरवैक-सेतु ज्ञानोन्नतिं विदध्यात् ॥ देशोऽस्तु० ॥

कृषका कृषौ नियुक्ता, तपसा श्रमेण पुष्टा ।
धन धान्य-भूति-युक्ता, हृष्टा श्रिया भवेयु ॥ देशोऽस्तु० ॥

ये दीन-हीन-लोका दुखाग्नि-ताप-तप्ता ।
शप्ता सुखैर्वियुक्ता, तेषां समुद्धृति स्यात् ॥ देशोऽस्तु० ॥

श्रमजीविनो हि लोकाः धनिभिस्तिरस्कृताः ये ।
वृत्यै च शोष्यमाणाः, राज्येन रक्षिताः स्युः ॥ देशोऽस्तु० ॥

श्रम शौर्य-दान-शक्तिः, सत्याग्रहेऽनुरक्तिः ।
परमेश-प्रीति-भक्तिः, प्रचरेत् समेऽपि लोके ॥ देशोस्तु० ॥

स्यादन्धभक्ति-नाशः नैर्घ्रुण्य-दोष-ह्रासः ।
करुणा-दया-प्रहासः, ज्योतिश्च जीवनेऽस्मिन् ॥ देशोऽस्तु० ॥

विश्वाभिराम-देश शौर्याप्ति-सौख्य-कोश ।
ज्ञानाग्नि दग्ध दोष, क्षेम श्रियं प्रणुद्यात् ॥ देशोऽस्तु० ॥

क्रान्तेर्ध्वज दधानं, शान्तेश्च मन्त्रदाता ।
विश्वस्य ज्ञानदाता दिव्या धियं तनोतु ॥ देशोऽस्तु० ॥

हिंसा-क्षुधा-विरोध, दीनाऽऽर्त-शोष त्रास ।
रोगाऽऽधि-दैन्य-दोष, शश्वद् विनाशमेयात् ॥ देशोऽस्तु० ॥

Proofread by Mandar Mali

*Bharatadeshah*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*